# संस्कृतवार्ता

## दिनाङ्कः-28.05.2026 प्रातः - 06:55

## अथ वार्ताः

**पीएम-प्रगति**

प्रधानमन्त्री नरेन्द्रमोदी 'स्वच्छ-भारत-अभियानम् 2.0 इत्यस्य प्रभावपूर्ण-क्रियान्वयनस्य आवश्यकतामुद्दिश्य सबलं प्रोक्तवान् यत् अभियानं आधारभूत-संरचना-निर्माणमतिक्रम्य नियमित-निरीक्षणेन, नागरिक-सहभागितया अथ विभिन्न-हितधारकाणां समन्वयेन 'मापनयोग्य-परिणामान्' सुनिश्चितं कुर्यात्। नवदेहल्यां एकपंचाशत् तमे 'प्रगति' उपवेशने अध्यक्षतां कुर्वन् श्रीमोदी राज्येभ्यः निर्दिष्टवान् यत् अपशिष्ट-प्रसंसकरण-संयन्त्राणि सहैव 'गोबरधन-संयन्त्राणि' च सम्मिलितं कृत्वा कठोर-अपशिष्ट-प्रबन्धन-सम्बद्धानां आधारभूत-परियोजनानां कार्यं शीघ्रं पूर्णं कुर्वन्तु। उपवेशनकाले प्रधानमन्त्रिणा त्रिंशत् सहस्रकोटिरूप्यकाणां सप्त महत्त्वपूर्ण-परियोजनानां समीक्षा विहिता। सः अवदत् यत् विद्युत्-व्ययं न्यूनीकर्तुं, ऊर्जासुरक्षां वर्धयितुम्, गृह-सामुदायिकस्तरे च स्वच्छ-ऊर्जायाः प्रसारार्थं रूफटॉप-सौर-योजना 'मिशन-मोड' रूपेण स्वीकरणीया।

**द्रौपदीमुर्मुः- सिक्किम**

राष्ट्रपतिः द्रौपदीमुर्मुः अद्य गंगटोक नगरस्य 'पालजोर-क्रीडाङ्गणे' आयोजिते समारोहे सिक्किम-आरक्षि -बलाय प्रतिष्ठितं 'प्रेसिडेंट्स पुलिस कलर' इति सर्वोच्चं सम्मानं प्रदास्यति। एतेन सह सिक्किम-राज्यम् सम्मानमिदं प्राप्तुं देशस्य पंचदशं राज्यं तथा उत्तर-पूर्व क्षेत्रस्य तृतीयं राज्यम् अभवत्। 'प्रेसिडेंट्स पुलिस कलर' इति सम्माननं देशे कस्यापि आरक्षि -बलस्य असाधारण-सेवायाः, सुदृढ-अनुशासनस्य तथा राष्ट्रं प्रति निष्ठायाः कृते दीयमानं सर्वोच्चम् औपचारिक-सम्माननं वर्तते।

**सी.बी.एस्.ई.**

केन्द्रीय-माध्यमिक-शिक्षा-परिषदा सी.बी.एस्.ई. इत्यनेन हैदराबादस्थितस्य शैक्षणिक-तन्त्रज्ञान-संस्थायै कोएम्प्ट एड्युटेक इत्यस्मै परीक्षा-परिणामानुबन्धाबन्टनस्य विषये आरोपा: निराकृता:। एकस्मिन् सामाजिकान्तर्जालीये पटलीये सन्देशे, सी.बी.एस्.ई. इत्यनेन आरोपः त्रुटिपूर्णः, भ्रमात्मकः, तथ्यहीनास्ति इति प्रतिपादितम्। परिषदा उक्तं यत् संस्थायै अनुबन्ध प्रदाने सामान्यवित्तीयनियमानां नियमावल्याः च निष्ठापूर्वकं पालनम् अभवत्। परिषदा सूचितं यत् षड्विंशत्यधिक द्विसहस्रतम वर्षस्य बोर्ड-परीक्षायाः उत्तरपुस्तिकानां डिजिटल-मूल्याङ्कनेभ्यः आर. एफ़्. पी. इति गतवर्षस्य अगस्त-मासे केन्द्रीय-सार्वजनिक-क्रयण-पोर्टल् इत्यत्र आरभ्य योग्याय निविदानुबन्ध: प्रदत्त: आसीत्।

**अमित शाह- गुजरात**

केन्द्रीय-गृहमन्त्री अमित शाहः अद्य गुजरात-राज्यस्य यात्रां प्रति एष्यति। स्वयात्रावधौ गृहमन्त्री अहमदाबाद-गान्धीनगर-मण्डलयोः प्रायः द्वादश-जनोपयोगी-शिक्षा-ग्रामीण-आधारभूत-संरचना-परियोजनानाम् उद्घाटनं शिलान्यासं च विधास्यति।

**उत्तरप्रदेश- ईद-उल-अज़हा**

ईद-उल-अज़हा अद्य कृत्स्ने उत्तरप्रदेशे सोत्साहं सोल्लासम् आचर्यते। बकरीद-पर्व निर्विघ्नेनाचरितुम् प्रशासनेन विस्तृता व्यवस्था कृता। राज्यसर्वकारेण सर्वेषां मण्डलारक्षिप्रमुखाणां कृते संचेतना प्रसरितास्ति यत् क्षेत्रे नूतन-परम्परायाः आरम्भः न भवेत्, निषिद्धानां पशूनां बलिः न भवेत् इति सुनिश्चितं कर्तव्यम्।

**आई.पी.एल. क्रिकेट**

आई.पी.एल. क्रिकेट-स्पर्धायाम्, गतरात्रौ न्यू चण्डीगढ़-नगरे क्रीडिते 'एलिमिनेटर' द्वन्द्वे राजस्थान-रॉयल्स-दलेन सनराइजर्स-हैदराबाद-दलं सप्तचत्वारिंशत् धावनाङ्कैः पराजितम्। राजस्थान रॉयल्स दलेन सनराइजर्स हैदराबाद दलस्य सम्मुखं चतुः चत्वारिंशदधिक द्विशत धावनाङ्कानां लक्ष्यं स्थापितम् आसीत्। प्रत्युत्तरे, हैदराबाद-दलं केवलं षड् नवत्यधिकैकशत् धावनाङ्कान् एव अवाप्नोत्।

**।।इति वार्ता:।।**